अथाश्विनप्रादुर्भावः “दक्षादधीत्य दस्रौ वितेनतुः संहितां स्वीयाम् । सकलचिकित्सकलोकप्रतिपत्तिविवृद्धये धन्याम् । स्वयम्भुवः शिरश्छिन्नं भैरवेण रुषाथ तत् । अश्विभ्यां संहितं तस्मात्तौ जातौ यज्ञभागिनौ । देवासुररणे देवा दैत्यैर्ये सक्षताः कृताः । अक्षतास्ते कृताः सद्योदस्राभ्यामद्भुतं महत् । वज्रिणोऽभूद्भुजस्तम्भः स दस्राभ्यां चिकित्सितः । सोम्नि निपतिते चेन्द्रस्ताभ्यामेव सुखीकृतः । विशीर्णदशनाः पूष्णोऽनेत्रे नष्टे भगस्य च । शशिनोराजयक्ष्माऽभूदश्विभ्यान्ते चिकित्सिताः । भार्गवश्च्यवनः कामी वृद्धः सन् विकृतिं गतः । वीर्य्यवर्णस्वरोपेतः कृतोऽश्विभ्यां पुनर्युवा । एतैश्चान्यैश्च बहुभिः कर्म्मभिर्भिषजां वरौ । बभूवतुर्भृशं पूज्याविन्द्रादीनां दिवौकसाम् । अथेन्द्रप्रादुर्भावः । संदृश्य दस्रयोरिन्द्रः कर्माण्येतानि यत्नवान् । आयुर्वेदं निरुद्वेगं तौ ययाचे शचीपतिः । नासत्यौ सत्यसन्धेन शक्रेण किल याचितौ । आयुर्वेदं यथाधीतं ददतुः शतमन्यवे । नासत्याभ्यामधीत्यैष आयुर्वेदं शतक्रतुः । अध्यापयामास बहूनात्रेयप्रमुखान् मुनीन् । अथात्रेयप्रादुर्भावः । एकदा जगदालोक्य गदाकुलमितस्ततः । चिन्तयामास भगवानात्रेयो मुनिपुङ्गवः । किं करोमि क्व गच्छामि कथम् लोका निरामयाः । भवन्ति, साम्यानेतान्न शक्नोमि निरीक्षितुम् । दयालुरहमत्यर्थं स्वभावो दुरतिक्रमः । एतेषां दुःखतोदुःखं ममापि हृदयेऽधिकम् । आयुर्वेदं पठिष्यामि नैरुज्याय शरीरिणाम् । इति निश्चित्य गतवानात्रेयस्त्रिदशालयम् । तत्र मन्दिरमिन्द्रस्य गत्वा शक्रं ददर्श सः । सिंहासनसमासीनं स्तूयमानं सुरर्षिभिः । भासयन्तं दिशोभासा भास्करप्रतिमत्विषा । आयुर्वेदमहाचार्य्यं शिरोधार्य्यं दिवौकसाम् । शक्रस्तु तं निरीक्ष्यैव त्यक्तसिंहासनो ययौ । तदग्रे पूजयामास भृशं भूरितपस्विनम् । कुशलं परिपप्रच्छ तथाऽऽगमनकारणम् । स मुनिर्वक्तुमारेभे निजागमनकारणम् । व्याधिभिर्व्यथितालोकाः शोकाकुलितचेतसः । भूतले सन्ति, सन्तापं तेषां हर्त्तुं कृपां कुरु । आयुर्वेदोपदेशं मे कुरु कारुण्यतो न्तृणाम् । तथेत्युक्तः सहस्राक्षोऽध्यापयामास तं मुनिम् । मुनीन्द्र इन्द्रतः साङ्गमायुर्वेदमधीत्य सः । अभिनन्द्य तमाशीर्भिराजगाम पुनर्म्महीम् । अथात्रेयो मुनिश्रेष्ठो भगवान् करुणापरः । स्वनाम्ना संहितां चक्रे-ऽरचक्रानुकम्पया । ततोऽग्निवेशं भेड़ं च जातूकर्णं पराशरम् । सीरपाणिं च हारीतमायुर्वेदमपाठयत् । तन्त्रस्य कर्त्ता प्रथममग्निवेशोऽभवत् पुरा । ततोभेड़ादयश्चक्रुः स्वस्वतन्त्रं, कृतानि तु । श्रावयामासुरात्रेयं मुनिवृन्देन वन्दितम् । श्रुत्वा च तानि तन्त्राणि हृष्टोऽभूदत्रिनन्दनः । यथावत्सूत्रितन्तस्मात्प्रहृष्टामुनयोऽभवन् । दिवि देवर्षयोदेवाः श्रुत्वा-साध्विति तेऽब्रुवन्” । अथ भरद्वाजप्रादुर्भावः “एकदा हिमवत्पार्श्वे दैवादागताः मुनयोबहवस्तांश्च नामभिः कथयाम्यहम् भरद्वाजोमुनिवरः प्रथमं समुपागतः ततोऽङ्गिरास्ततोगर्गो मरीचिर्भृगुभार्गवौ । पुलस्त्योऽगस्तिरसितोवशिष्ठः सपराशरः । हारीतोगौतमः सांख्यो मैत्रेयश्च्यवनोऽपि च । जमदग्निश्च गार्ग्यश्च काश्यपः कश्यपोऽपि च । नारदो वामदेवश्च मार्कण्डेयः कपिष्ठलः । शाण्डिल्यः सह कौण्डिल्यः शाकुनेयश्च शौनकः । आश्वलायनसांकृत्यौ विश्वामित्रः परीक्षितः । देवलोगालवोधौम्यः काप्यकात्यायनावुभौ । काङ्कायनो वैजवापः कुशिकोवादरायणः । हिरण्याक्षश्च लौगाक्षिः शरलोमा च गोभिलः । वैखानसाबालखिल्यास्तथैवान्ये महर्षयः । ब्रह्मज्ञानस्य निधयो यमस्य नियमस्य च । तपन्तस्तेजसा दीप्ताहूयमाना इवाग्नयः । सुखोपविष्टास्ते तत्र सर्वे चक्रुः कथामिमाम् । धर्म्मार्थकाममोक्षाणां मूलमुक्तं कलेवरम् । तच्च संसिद्धये शक्तं भवेद्यदि निरामयम् । तपःस्वाध्यायधर्माणां ब्रह्मचर्य्यव्रतायुषाम् । हर्त्तारः पुरतोरोगा यत्र तत्र च सर्वतः । रोगाःकार्श्यकराबलक्षयकरादेहस्य चेष्टाहरा दृष्ट्यादीन्द्रियशक्तिसंक्षयकराः सर्वाङ्गपीड़ाकराः । धर्म्मार्थाखिलकामसुक्तिषु महाविघ्नस्वरूपाबलात्प्राणानाशु हरन्ति सन्ति यदि ते क्षेमं कुतः प्राणिनाम् । तत्तेषां प्रशमाय कश्चन विधिश्चिन्त्योभवद्भिर्बुधैर्योग्यैरित्यभिधाय संसदि भरद्वाजं मुनिन्तेऽब्रुवन् । त्वं योग्यो भगवन्! सहस्रनयनं याह्यो हि शीघ्रं क्रमादायुर्वेदमधीत्य यद्गदभयान्मुक्ता भवामोवयम् । इत्युक्तः स मुनिभिर्योग्यैः प्रार्थितो विनयान्वितैः । भरद्वाजो मुनिश्रेष्ठो जगाम त्रिदशालयम् । तत्रेन्द्रभवनं गत्वा सुरर्षिगणमध्यगम् । दृष्टवान् वृत्रहन्तारं दीप्यमानमिवानलम् । सोऽभिगम्य जयाशीर्भिरभिनन्द्य सुरेश्वरम् । ऋषीणां वचनं सम्यक् श्रावयामास सत्तमः । व्याधयो हि समुत्पन्नाः सर्वप्राणिभयङ्कराः । तेषां प्रशमनोपायं यथावद्वक्तुमर्हसि । तमुवाच मुनिं साङ्गमायुर्वेदं शतक्रतुः । जीवेद्वर्षसहस्राणि देही नीरुग्भिरस्य यम् । सोऽनन्तपारन्त्रिस्कन्धमायुर्वेदं महामतिः । यथावदचिरात्सर्वं बुबुधे तन्मना मुनिः । तेनायुः सुचिरं लेभे भरद्वाजो निरामयम् । अन्यानपि मुनींश्चक्रे नीरुजः सुचिरायुषः ।